# શ્રીકાન્તિમતીશ્વર્યષ્ટકમ્

Shri Kantimatishvari Ashtakam

sanskritdocuments.org

November 17, 2018

# Shri Kantimatishvari Ashtakam

# શ્રીકાન્તિમતીશ્વર્યષ્ટકમ્

## Sanskrit Document Information

Text title : Tirunelveli Kanthimathi Ambal kAntimatIshvaryaShTakam

File name : kAntimatIshvaryaShTakam.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, aShTaka

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran psaeaswaran at gmail.com

Description/comments : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Latest update : November 18, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 17, 2018

*sanskritdocuments.org*

# શ્રીકાન્તિમતીશ્વર્યષ્ટકમ્

॥ શ્રીઃ ॥

શ્રીમદ્વેણુવનેશ્વરસ્ય રમણીં શીતાંશુબિમ્બાનનાં
શિઞ્જન્નૂપુરકોમલાઙ્ઘ્રિકમલાં કેયૂરહારાન્વિતામ્ ।
રત્નસ્યૂતકિરીટકુણ્ડલધરાં હેલાવિનોદપ્રિયાં
શ્રીમત્કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૧॥

તત્ત્વજ્ઞાનિહૃદબ્જમધ્યનિલયાં તામ્રાપગાતીરગાં
કારુણ્યામ્બુનિધિં તડિત્તુલિતભાં તાલીદલશ્યામલામ્ ।
લીલાસૃષ્ટિવિધાયિનીં તનુભૃતાં તાત્પર્યબોધાપ્તયે
તન્વીં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૨॥

સઙ્ગીતામૃતસિન્ધુમધ્યભવનાં સાહિત્યનિત્યાદરાં
સ્વારસ્યાદ્ભુતનાટ્યવીક્ષણપરાં સાલોક્યમુક્ત્યાદિદામ્ ।
સાધુભ્યઃ સકલામરાર્થિતમહાસામ્રાજ્યલક્ષ્મીપ્રદાં
સાધ્વીં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૩॥

કલ્યાણીમખિલાણ્ડકોટિજનનીં કલ્હારદામોજ્જ્વલાં
કસ્તૂરીતિલકાભિરામનિટિલાં કઞ્જાસનારાધિતામ્ ।
કામારેઃકનકાચલેન્દ્રધનુષઃ કારુણ્યવારાન્નિધેઃ
કાન્તાં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૪॥

ભક્તાનાં ભયજાલભઞ્જનકરીં ભાન્વબ્જશુક્રેક્ષણાં
ભાગ્યોદારગુણાન્વિતાં ભગવતીં ભણ્ડાસુરધ્વંસિનીમ્ ।
ભાસ્વદ્રત્નકિરીટકુણ્ડલધરાં ભદ્રાસનાધ્યાસિનીં
ભવ્યાં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૫॥

દેવાનામભયપ્રદાં વિધિનુતાં દુષ્ટાપહન્ત્રીં સુખાં
દેશાનેકદિગન્તમધ્યનિલયાં દેહાર્ધદાસ્યપ્રિયામ્ ।

માધુર્યાકરચન્દ્રખણ્ડમકુટાં દેવાઙ્ગનાસેવિતાં
    દેવીં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૬॥

દુષ્ટાટોપવિનાશનૈકનિપુણાં દૌર્ભાગ્યવિચ્છેદિનીં
    દુર્માત્સર્યમદાભિમાનમથિનીં દુઃખાપહાં પ્રાણિનામ્ ।
દુર્વારામિતદૈત્યભઞ્જનકરીં દુઃસ્વપ્નહન્ત્રીં શિવાં
    દુર્ગાં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૭॥

મન્દસ્મેરમુખામ્બુજાં મરકતશ્યામાં મહાવૈભવાં
    માતઙ્ગીં મહિષાસુરસ્ય શમનીં માતઙ્ગકુમ્ભસ્તનીમ્ ।
મન્દારદ્રુમસન્નિભાં સુમધુરાં સિંહાસનાધ્યાસિતાં
    માન્યાં કાન્તિમતીશ્વરીં હૃદિ ભજે શ્રીરાજરાજેશ્વરીમ્ ॥ ૮॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકાન્તિમતીશ્વર્યષ્ટકં સમ્પૂર્ણમ્ ।

A Rare Composition on Tirunelveli Kanthimathi Ambal

NA, PSA Easwaran psaeaswaran at gmail.com

*Shri Kantimatishvari Ashtakam*
pdf was typeset on November 17, 2018

Please send corrections to *sanskrit@cheerful.com*